# SANSKRIT

**Time Allowed: 3 Hours** **Maximum Marks : 85**

परीक्षार्थी यथासंभव अपने शब्दों में ही उत्तर दें।

प्रत्येक प्रश्न के अंक उसके सामने दिए गए हैं।

विशेष निर्देश :

(i) अपनी उत्तर–पुस्तिका के मुख्य पृष्ठ के ऊपर बायीं ओर दिए गए वृत्त में प्रश्न–पत्र सीरीज अवश्य लिखिए।

(ii) प्रश्नों के उत्तर देते समय जो प्रश्न–संख्या प्रश्न–पत्र पर दर्शाई गई है, उत्तर–पुस्तिका पर वही प्रश्न–संख्या लिखना अनिवार्य है।

(iii) उत्तर–पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़िए।

(iv) सभी प्रश्न अनिवार्य हैं। प्रश्नों के सभी भागों को एक साथ कीजिए।

(v) सभी प्रश्नों के उत्तर प्रश्नानुसार संस्कृत में ही दीजिए।

(vi) सुन्दरता और शुद्धता अनिवार्य है।

## भाग–क

## ''अपठित–अवबोधनम्''

प्र.1 अधोलिखितम् अनुच्छेद्ं अधीकृतस्य निर्देशित प्रश्नामुत्तराणि दीयताम्। (1x5=5)

अहम् एकः छिन्नः द्रुमः अस्मि। ह्यः वने एकः नरः आगच्छत्। सः काष्ठाय मम शरीरम् अच्छिनत्। छेदनेन मे शरीरे अनेके व्रणाः जाताः। छरिकायाः प्रहारेण शरीरात् अश्रु रूपाः जलबिन्दवः अपतन्। अकथनीया मम पीडा। ह्रदयं विदीर्णं जातम्। अश्रुभिः कण्ठः अवरूद्धः। मम अन्तकालः समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य सः तु अगच्छत्। परं कोडस्ति अत्र व्यथा कथा श्रवणाय? वृक्षान् छित्त्वा नरः प्रकृतिमातुः अङ्गानि नाशयति। इन्धनाय, कर्गदपत्राय भवन निर्माणाय मम काष्ठस्य प्रयोगः भवति। किन्तु कुतः मे पत्राणि, पुष्पाणि कुतः च रोगनिवाराय औषधयः? निराश्रिताः भविष्यन्ति आश्रिताः खगाः कीटपतङ्गश्च। पन्थानः अपि छायाहीनाः भविष्यन्ति। आतपेन तप्तः श्रान्तः पथिकः अधुना गमिष्यति? मम जीवने पुनः वसन्र्ततुः न आगमिष्यति।

1 एकपदेन उत्तरत :–

(क) वृक्षेषु व्रणाः केन जाताः?

(ख) जनाः कथम् छायाहीनः भवन्ति?

(ग) वृक्षस्य शरीरम् कः अच्छिनत्?

2 पूर्ण वाक्येन उत्तरत :–

(क) वृक्षस्य प्रयोगः कुत्र–2 भवति?

3 निर्देशानुसार उत्तरत :–

अश्रुरूपाः जलविन्दवः अस्मिन् पदे किम्विशेषणं पदं।

प्र.2 अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित प्रश्नानाम् उत्तराणि दीयन्ताम्।

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। पशवः वनस्पतयः च तस्याः एव अङ्गानि। निराशाः असहायाः जनाः तस्याः एव आश्रयं प्राप्नुवन्ति। सा स्वमनोहरेण सौन्दर्येण नीरसम् ह्रदयम् अपि सरसं करोति। सूर्यः चन्द्रः च तस्याः नेत्रे। शस्य श्यामला एवा भूमिः। विविधाः औषधयः सकलानि खनिजानि च प्रकृतेः एव शोभा। सा तु नित्यम् एवं एतैः साधनैः सर्वेषाम् उपकारं करोति। परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति, विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाच्छति चेत् तर्हि प्रकृतेः प्रतिकुलं कदापि न आचरेत् इति।

1 एक पदेन उत्तरतः–

(क) मनुष्यैः सह कस्याः शाश्वतः संबंधः? 1

(ख) नरः कथं सुखं अधिगच्छति? (पूर्णवाक्येन उत्तरत) 1

(ग) उपरोक्तं गद्यांशम् पठित्वा तृतीयांश रूपेण सारं लिख्यन्ताम्। 3

(घ) प्रदत गद्यांशस्य शीर्षकं विधीयताम्। 2

भाग–ख (रचनात्मकं कार्यम्)

प्र.3 सुकन्या कोलकातानगरे छात्रावासे निवसति। सा विद्यालयतः शैक्षिक भ्रमणाय भुवनेश्वरं गन्तुम् इच्छति। एतदर्थम् अनुमतिं राशि च प्राप्तुं सा नव दिल्लीस्थं पितरं प्रति पत्रम् एकम् लिखति। मंजूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।

| |
|---|
| प्रणामः, सह, कोलकातातः, स्यात्, पंचशतम्, |
| 110019, भुवनेश्वरम्, प्रथमसत्रीया, मम, पुत्री |

( $\frac{1}{2}$ x 10 = 5)

छात्रावासः

राजकीयः विद्यालयः

(i) ————————

तिथि : 25–2–2001

माननीयाः पितृवर्याः,

सादरं प्रणमामि।

भवन् पत्रं प्राप्तम्। मम (ii)————————परीक्षा समाप्ता। परीक्षापत्राणि अतिशोभनानि जातानि। यावत् परीक्षा परिणामः न अग्रिममासस्य आगामिमासस्य प्रथमसप्ताहे (iii) ————————————विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिक भ्रमणाय (iv) ——————— नेष्यन्ति। अहम् अपि ताभिः (v)——————— गन्तुम इच्छामि। एतदर्थम् मया कक्षाध्यापिकायै (vi) ————————रूप्यकाणि दातव्यानि सन्ति। अतः यदि अनुमतिः (vii)—————— तर्हि अहम् अपि गच्छेयम्। ज्ञानवर्धनार्थम् एतत् अतिरिच्य अवसरं न पश्यामि। अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु।

सर्वेभ्यः मम (viii) ————————निवेदनीयाः

भवतां प्रिया (ix) ———————

सुकन्या

नव दिल्ली (x) ——————————

प्र.4 मञ्जूषामधिकृत्य अधोलिखित सम्वादम् पूर्यन्ताम्।

–

$(\frac{1}{2} \times 10 = 5)$

| |
|---|
| अधिगततत्त्वः, यस्यमानसं शुद्धम्, सर्वथात्यागी, दृष्टादृष्ट–लाभाढये, विवेकी, मूर्खत्वम्, सत्यप्रियभाषिणो विनीतस्य, गुरूवचनम्, अनवद्यम्, साधुजन मैत्री |

प्रकृति : कस्य वशे प्राणिगणः?

सौरभः : ———————।

प्रकृति : किमुपादेयम्?

सौरभः : ———————।

प्रकृति : क्व स्थातव्यम्?

सौरभः : ——————————।

प्रकृति : किं जीवितम् ?

सौरभः : ——————————।

प्रकृति : को जागर्ति ?

सौरभः : ——————————।

प्रकृति : किं मरणम् ?

सौरभः : ——————————।

प्रकृति : का सुखदा ?

सौरभः : ——————————।

प्रकृति : को गुरूः ?

सौरभः : ——————————।

प्रकृति : को दक्षः ?

सौरभः : ——————————।

प्रकृति : कः शुचिरिह ?

सौरभः : ——————————।

प्र.5 अधोलिखितेषु विषयेषु एकं विषयमधिकृत्य पंच वाक्यानि लिखत । **5**

(क) पर्यावरणम्

(ख) मम विद्यालयः

(ग) मम अध्यापकः

भाग–ग (अनुप्रयुक्तं व्याकरणम्)

प्र.6 निम्नलिखितेषु त्रिषु पदेषु सन्धिच्छेदं क्रियताम्। **3**

वागीशः, रमेशः, यद्यपि, नमस्ते

प्र.7 अधोलिखितेषु वाक्येषु समासं अधिकृत्य समस्त पदं विग्रहं वा विधीयन्ताम्।

$(\frac{1}{2} \times 4 = 2)$

(क) सः———————————कार्यं करोति (यथाशक्ति)

(ख) ———————जनः सम्मानं न लभते। (पथभ्रष्टः)

(ग) ————————सः शङ्करः कथ्यते। (त्रीणिनेत्राणियस्य)

(घ) रमेशः अद्य विद्यालये——————आसीत्। (न उपस्थितः)

प्र.8 अधोलिखितेषु वाक्येषु कोष्ठके निर्दिष्टः प्रकृति प्रत्ययं पृथक्–पृथक् कृत्वा सम्मेल्य वा लिखित्।

(1 x 5= 5)

(1) बालकैः राष्ट्रगीतं————————। (गै+तव्यत्)

(2) विद्वद्भिः कविताः ———————। (रच+अनीयर)

(3) त्वया पाठः ——————————। (स्मरणीयः)

(4) ————— नरः विचारशीलः भवित। (बुद्धिमान्)

(5) ————————————श्रेष्ठः गुणः। (उदारता)

प्र.9 प्रदत्तानि अव्ययपदानि अधिकृत्य, अधोलिखित अनुच्छेदं पूर्णयताम्। ($\frac{1}{2}$ x10=5)

| |
|---|
| यदा–कदा, यत्र, वृथा, अधुना, शनैः, तत्र, खलु<br>नूनं, इति, अपि |

विद्यायाः आलयः ———विद्यालयः कथ्यते। विद्यालये छात्राः———उद्दण्डतां दर्शयन्ति। ———एतत् आधुनिक शिक्षायाः परिणामः। विद्या———विदुषां भूषणं अस्ति।—————विद्यायाः प्रकाशः——अज्ञानस्यनाशः। ज्ञानं——————ग्रहणीयम्।——— ज्ञानं मूर्खाणाम्।——— ज्ञानस्यमहत्वं अस्ति। विद्या गुरूणां ——— गुरूः।

प्र.10 अधोलिखित वाक्येषु त्रीणि वाक्यानि अधिकृत्य वाच्य परिवर्तनं कुरूत। (1x3=3)

(1) माता ओदनं पचति।

(2) अहं पत्रं लिखामि।

(3) तेन स्थीयते।

(4) छात्रैः प्रार्थना क्रियते।

प्र.11 घटिका चित्रानुसारं समयं संस्कृत भाषायां लिखत्। (1x4=4)

4:45 | 5:15 | 6:30 | 9.00

प्र.12 अधोलिखितेषु पदेषु चतुर्पदानां पद परिचयं दीयन्ताम्। (1x4=4)

अनमत्, पठतु, गच्छसि, ग्रामात्, मया, कस्मिन्।

प्र.13 निम्नवाक्येषु लिङ्गधारित सँख्यावाचक पदानि प्रयुज्यताम्। (2)

(1) ——————भक्ताः मन्दिरमगच्छत्। (चतस्त्रः, चत्वारः, चत्वारि)

(2) मम स्यूते——————पुस्तकानि सन्ति। (तिस्र , त्रयः, त्रीणि)

(3) कक्षायाम्—————— बालिके स्तः। (द्वौ, , द्वयः,: ,द्वे)

(4) सरोवरे—————— कमलं खिलति। (एकः, एकम्, एका)

–

प्र.14 निम्न वाक्यानि संशोधयत्। ($\frac{1}{2}$ x4=2)

(1) कृष्णं नमः। (2) अलम् विवादात्।

(3) एषः मोहनस्य उद्यानम् अस्ति। (4) लता पठन्ति।

## भाग–घ
## "पठित–अवबोधनम्"

प्र.15 अधोलिखित गद्यांशस्य हिन्दी भाषायां

(अ) अनुवादम् विधीयन्ताम्। 5

राजा उवाच–भगवन्। भगवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतम् कर्तुम् इच्छामि। आदिश्यताम् किं करवाणि? विप्रः उवाच– यदि भवान् प्रीतः, तदा त्वतः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत श्रुत्वा राजा अचिन्तयत्, "लोके चर्क्षुदानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतुनाम किं बहु चिन्तनेन। "इति विचार्य राजा अभाषत्–भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्दूयमेव प्रयच्छामि इति।

(आ) निम्न पद्यांशम् पठित्वा तदाधारित् प्रश्नामुत्तराणि दीयन्ताम्। (1x5=5)

अपूर्वः कोऽपि कोशोइयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात्।।

(1) एक पदेन उत्तरत :–

(क) सरस्वत्याः कोशः कथं वर्धते?

(ख) संचयात् किं भवति? (पूर्ण वाक्येन उत्तरत)

(ग) भारत्याः कोशः कीदृशः अस्ति। (पूर्ण वाक्येन उत्तरत)

(घ) वृद्धिमायाति इति पदे सन्धिम् विधीयताम्

(ङ) "अपूर्वः" इति पदे कः समासः।

(इ) निम्न नाटयांशम् पठित्वा तदाधारित प्रश्नाम् उत्तराणि लिखत्। (1x5=5)

द्रौपदी : (भीमं प्रति) आर्य पुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात्रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट–नगरे अपि त्वं मां प्राणसंकटात् उद्धृतवान्।

भीमः : (युधिष्ठिरं प्रति) भ्रातः द्रौणिम् अनुगन्तुं मध्यम् अनुमतिं ददातु भवान्।

युधिष्ठिरः : गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु।

(भीमसेनः निर्गच्छति, श्री कृष्णः अर्जुनेन सह प्रविशति)

श्रीकृष्णः : भो धर्मराज! समीचीनं क कृतं भवता। (पुत्रशोक विहवलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।)

(1) एक पदेन उत्तरतः –

(क) (1) भीमसेनः कम् हन्तुम् अभिधावति?

(2) अत्र कति पात्राणि वार्तालाापं कुर्वन्ति?

(ख) पूर्ण वाक्येन उत्तरत :

(1) नकुलः कस्य सारथि आसीत्?

(2) "अनुगन्तुम" इति पदे कः प्रत्यय प्रयुक्तः?

(3) "समीचीनं" इति पदस्य कः पर्यायः?

प्र.16 निम्न पद्यांशस्य सान्वयः हिन्दी भाषायाम् अनुवादम् क्रियन्ताम्। (4)

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः

तस्माद् रक्षेत् सदाचारं प्राणोभ्योऽपि विशेषतः।।

प्र.17 निम्न वाक्यानि यथा निर्दिष्टं कुरूत्। (1x5=5)

(क) निः सार लघुधनम्?

(1) सारहीनम् धनम्।

(2) चञ्चलम् धनम्।

(3) तुच्छ धनम्।

(ख) मम कलनस्य तु आधारः सूर्य एव?

(1) सूर्य एव काल गणनां करोति।

(2) सूर्यम् विना कालस्य गणना न भवति।

(3) सूर्यः अपि कालगणनायाः आधारः।

(ग) वर्षम्–पक्षम्–दिनम्–मासम्।

(उचित क्रमानसुारम् लिखत्)

(घ) मेषेणं सह———————कलहः वानराणां विनाश कारकः अभवत्।

(राजाम्, सूपकाराणां, अश्वानाम्)

(ङ) पवनः, अनिलः, अनलः, वायुः।

(अर्थदृढट्या भिन्न पदं रेखाकिंत कुरूत)

प्र.18 अधोलिखि वाक्येषु रेखांङ्कित पदानां अधिकृत्य प्रश्न निर्माणम् कुरूत। $(\frac{1}{2} \times 4 = 2)$

(क) <u>विषादं</u> त्यक्त्वा उद्यमः क्रियताम्।

(ख) अरूणः <u>सूर्यस्य</u> पर्यायः।

(ग) संवत्सरे <u>द्वादश</u> मासाः भवन्ति।

(घ) सः राजा <u>तान</u> उवाच।

प्र.19 अधोलिखित विशेष्यैः सह समुचित विशेषणानि योजयत्। $(\frac{1}{2} \times 4 = 2)$

(क) गोमहिषसदृशः कार्यम्

(ख) सामाजिकम् ऐतिहासिकस्थालानि

(ग) प्रभुखानि राजपशुः

(घ) दर्शनीयानि आजीविकासाधनानि